# संस्कृतवार्ता:

**दिनाङ्क:-05.01.2026**
**प्रात: - 06:55**

## प्रधानमन्त्री वॉलीबॉल

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् विभिन्नासु क्रीडासु भारतस्य प्रदर्शनं चतुर्दशोत्तर-द्विसहस्रतम-वर्षात् निरन्तरं समेधते। श्रीमोदी आभासीय-माध्यमेन वाराणस्याः 'डॉ. संपूर्णानंद-क्रीडाप्राङ्गणे' द्विसप्ततितमायाः राष्ट्रिय-वॉलीबॉल-स्पर्धायाः उद्घाटनम् अकरोत्। अमुना उक्तं यत् भारतं षडत्रिंशदुत्तर-द्वि-सहस्रतमे वर्षे ऑलम्पिक-क्रीडायाः आयोजनाय सिद्धतायै प्रयासरतो वर्तते।

सः अवदत् यत् तस्य सर्वकारः राष्ट्रिय-क्रीडा-प्रशासन-अधिनियमः खेलो-भारत-नीतिः विंशति पञ्चविंशतिः इत्यादीनि क्रीडायाः क्षेत्रे अनेकानि परिवर्तनानि, परिष्कारान् च आनयति। प्रधानमन्त्री अवदत् यत् देशस्य क्रीडा-प्रतिमानम् अधुना क्रीडक-केन्द्रितम् अस्ति, अतः चतुर्दशोत्तर-द्विसहस्रतम-वर्षात् परं क्रीडकानां सफलतायां महती वृद्धिः अभवत्। क्रीडायाः क्षेत्रे स्व-सर्वकारस्य प्रयत्नान् अधोरेखयन् श्रीमोदी अवदत् यत् सर्वकारः विविध- क्षेत्रेषु विषयेषु च कार्यं कुर्वन् अस्ति, येषु प्रतिभायाः अभिज्ञानम्, वैज्ञानिकप्रशिक्षणं, पौष्टिकभोजनं प्रदातुं, पारदर्शकं चयनं च अन्तर्भवन्ति।

ह्यः आरभ्य जनवरी-मासस्य एकादश दिनाङ्कपर्यन्तं आयोज्यमानायाम् अष्ट-दिवसीय-प्रतियोगितायां, आदेशात् सहभागिता दृश्यते, यत्र विविधराज्यानां संस्थानां च प्रतिनिधित्वं कुर्वताम् अष्टपञ्चाशत् दलानां भागरूपेण सहस्रतोप्यधिकाः क्रीडकाः भागं स्वीकुर्वन्ति।

## वेनेज़ुएला

वेनेज़ुएला-देशे सद्यः एव घटितानां घटनानां विषये भारतं गभीरां चिन्तां प्रकटयति। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् तत्रत्य-स्थितिः निकटतया निरीक्षिता अस्ति। वेनेज़ुएला-देशस्य जनानां कल्याणाय सुरक्षायै च भारतं स्वसमर्थनं पुनः दृढीकृतवान्। नवदिल्या संवादस्य माध्यमेन, क्षेत्रे शान्तिं स्थिरतां च सुनिश्चेतुं, विषयान् शान्तिपूर्वकं समापयितुं सम्बद्धेभ्यः सर्वेभ्यः आह्वयत्। काराकस-नगरे भारतीय-दूतावासः भारतीय-समुदायस्य सदस्यैः सह सम्पर्कं कुर्वन् अस्ति तथा च सर्वान् यथा-सम्भव-साहाय्यं प्रददाति।

## समुद्रप्रताप:

भारतीय-तटरक्षकस्य प्रथमं स्वदेशीय-परिकल्पित: निर्मित: च प्रदूषणनियन्त्रक- कुम्भ: 'समुद्रप्रताप:' अद्य गोवाराज्ये रक्षामन्त्रिणा राजनाथ सिंहेन संचालितो भविष्यति। अस्मिन् षष्ठी प्रतिशतात् अधिकाः स्वदेशीय-पदार्थाः सन्ति। समुद्रीय-प्रदूषणनियन्त्रणनियमान् प्रवर्तयितुं, समुद्रीय-विधिं -प्रवर्तनार्थं, अन्वेषण-उद्धार-कार्याणि कर्तुं, भारतस्य विशेष-आर्थिकक्षेत्रस्य रक्षणार्थं च एतत् महत्त्वपूर्णं स्थानं भजते।

**ऋतु-विज्ञान विभाग**

भारतीय ऋतुविज्ञान-विभागेन आगामिद्विदिवसेषु दिल्ली, हरियाणा, चण्डीगढ, ओडिशा, पञ्जाब, पूर्व-उत्तरप्रदेश, मध्यप्रदेश राज्येषु अतिनीहारस्य पूर्वानुमानं प्रकटितम्। अतिनीहाराच्छादनात् देशस्य विभिन्नेषु भागेषु अनेकानां रेलयानानां आवागमनं बाधितम् अभवत्। भारतीय रेल विभागानुसारं एकादश रेल-यानानि घण्टाद्वयेभ्यः अपि अधिकाः विलम्बिताः सन्ति।

**।।इति वार्ता:।।**